# CSM – 44/18

# Indian Language & Literature in Sanskrit

## Paper – I

*Time : 3 hours*

*Full Marks : 300*

Techofworld.In

*The figures in the right-hand margin indicate marks.*

*Candidates should attempt Q. No. 1 from Section – A and Q. No. 5 from Section – B which are compulsory and any* ***three*** *of the remaining questions, selecting at least* ***one*** *from each Section.*

## SECTION – A

1. केषाञ्चन त्रयाणां विभागानामुत्तरं दीयताम् : 20×3 = 60

(क) अधोनिर्दिष्टानां शब्दानां यथोचितं सन्धिं सन्धिविच्छेदं वा कुरुत :

(i) तथैवात्र

(ii) जीवन्नेव

(iii) भागावात्मनः

(iv) द्वि + अंशहरः

(v) मातुरुपादानम्

(vi) दुस् + चरित्रः

(vii) अतोऽयमेकः

(viii) सर्वोऽप्ययम्

(ix) सः + एव

(x) कृष्ण + ऋद्धिः

Techofworld.In

(ख) अधोनिर्दिष्टानां समस्तपदानां समासनामानि विग्रहवाक्यानि च लिखत :

(i) उपगङ्गम्

(ii) मातृसदृशः

(iii) मुखकमलम्

(iv) वीणापाणिः

(v) सप्तशती

(ग) अधोनिर्दिष्टानां सूत्राणामर्थं सोदाहरणं प्रतिपादयत :

(i) कर्त्तृकरणयोस्तृतीया

(ii) कालाध्वनोरत्यन्तसंयोगे

(iii) चतुर्थी संप्रदाने

(iv) येनाङ्गविकारः

(v) अपादाने पञ्चमी

(घ) निम्नवाक्यानां वाच्यपरिवर्त्तनं कुरुत :

(i) लक्ष्मीः सत्ये निवसति ।

(ii) गायन्ति देवाः किल गीतकानि ।

(iii) स्वदेशे पूज्यते राजा ।

(iv) विद्या ददाति विनयम् ।

(v) तपसा किल्विषं हन्ति ।

Techofworld.In

2. भारोपीयभाषापरिवारस्य प्रविभागान् विशदीकुरुत । 60

3. ऋग्वेदस्य संहिता-ब्राह्मण-आरण्यक-उपनिषदां संक्षिप्तपरिचयं प्रदीयत । 60

4. 'माघे सन्ति त्रयो गुणाः' इति विद्वदुक्तिं शिशुपालवधकाव्याधारेण विचारयत । 60

## SECTION – B

5. यथेच्छं त्रयः प्रश्नाः समाधेया : 20×3 = 60

(क) संस्काराणां अनुष्ठानकालसूचनपूर्वकं तेषां आवश्यकता किमिति प्रपञ्चयत ?

(ख) चतुर्विधपुरुषार्थेषु मोक्ष एव परमपुरुषार्थः इत्यमुं विषयं अधिकृत्य प्रबन्धमेकं रचयत ।

(ग) ब्रह्मचर्यादि आश्रमाणां आश्रमधर्मान् विस्तरेण निरूपयत ।

(घ) अर्थशास्त्रमनुसृत्य गूढपुरुषोत्पत्तिं निरूपयत ।

6. का नाम समाधिःतस्या द्वैविध्यं निरूप्य निर्बीजसमाधेः अष्टौऽङ्गानि विस्तरेण प्रतिपादयत । 60

7. विश्वशान्तेः उपायाः इत्यमुं शीर्षकं अवलम्ब्य प्रबन्धमेकं सविस्तरं निरूपयत । 60

8. गद्यांशं अमुं उपाश्रित्य अधः प्रदत्ताः सर्वे एव प्रश्नाः समाधेया : 10×6 = 60

Techofworld.In

निखिलेऽपि संस्कृतवाङ्मये कविकुलगुरुः कालिदासो यथा रचनाचातुर्येण कल्पनावैचित्र्येण च पद्यबन्धे गरिष्ठो वरिष्ठश्च तथैव गद्यकाव्यनिबन्धने कविवरो बाणोऽतिशेतेऽन्यान् सर्वानप्यभिरूपान् । पद्यरचनायां केषुचिदेव पद्येषु उक्तिवैचित्र्येण भावगाम्भीर्येण कृतिकौशलेन वाऽपूर्वा छटा संजायतेऽखिलेऽपि काव्ये । परं नैतावतैव सम्भाव्यते गद्यकाव्येऽपि तादृश्यनुपमा कान्तिः । गद्यकाव्ये तु भूयान् श्रमोऽपेक्ष्यते । पदे पदे वाग्वैचित्र्यमर्थगाम्भीर्यं भाववैभवं कल्पनाकाम्यत्वं च दुर्निवारम् । अतः साधूच्यते गद्यं कवीनां निकषं वदन्ति । गद्यकाव्यबन्धे दण्डी सुबन्धुश्चेति द्वावेतौ बाणेन समं सनामग्राहमुल्लेख्यौ । परं बाणो गरिष्ठो वरिष्ठश्च त्रयाणाम् एतेषां भूयिष्ठया मनोभावाभिव्यक्त्या साधिष्ठया शैल्या प्रदिष्ठया मनोहरतया श्रेष्ठया साधुतया प्रेष्ठया पदपरिष्कृत्या च । बाणस्य वस्तुविवृतौ वर्णने चापूर्वं वैशारद्यं वीक्ष्य न्त्रमुग्धत्वमनुभवन्ति मनीषिणः । वर्ण्यस्य वस्तुनोऽणुतमामपि विवृतिं न विजहाति न किञ्चिदुज्झति परस्मै यत्तेन शक्यं वर्णयितुम् । वर्णानानां व्यापित्वात् सर्वाङ्गीणत्वात् सूक्ष्मतमविवरण-समन्वितत्वाच्च बाणोच्छिष्टं जगत्सर्वम् इति भूयो भूयो व्यादिश्यते । एतदेवात्र समासतः समुपस्थाप्यते । हर्षचरिते कवेर्वर्णन चातुरी बहुशोऽवलोक्यते । तेषु मुख्यत उल्लेख्याः प्रसङ्गाहः सन्ति

मुमूर्षोर्नृपस्य प्रभाकरवर्धनस्य वर्णनम् वैधव्य दुःखपरिहाराय सतीत्वमाश्रयन्त्या यशोवत्या वर्णनम् सिंहनादस्योपेशः दिवाकरमित्रस्य राज्यश्री सान्त्वनम् । शुकनासोपदेशे कवेः प्रतिभायाश्चरमोत्कर्षो लक्ष्यते । तत्र कवेर्लेखनी भावोद्रेके प्रवहमानेव प्रतीयते । शुकनासोपदेशे साक्षात् प्रयते यतीवाणी बाणो बभूव ह ।

Techofworld.In

**प्रश्नाः**

(क) संस्कृतवाङ्मये पद्यबन्धे गद्यबन्धे च रचनाचातुर्येण कल्पनावैचित्र्येण च कौ गरिष्ठौ वरिष्ठौ ?

(ख) गद्यं कवीनां निकषं वदन्ति इत्युक्तेः भावं वर्णयत

(ग) गद्यकाव्यबन्धे बाणेन समं केषां नामग्रहमुल्लेख्यौ ?

(घ) बाणोच्छिष्टं जगत्सर्वं इत्यस्य अर्थः कः ?

(ङ) हर्षचरिते कवेर्वर्णनचातुरी बहुशऽवलोक्येत इत्यस्य प्रमाणमुपपादयत

(च) शुकनासोपदेशे साक्षात् किम् प्रतीयते